पष्ठतीयः स्वरान्तेन संयुतो विन्दुनेन्दुना ।
कीर्त्तितस्तस्य मन्त्रोऽयं तेन तं परिपूजयेत् ॥”
इति कालिकापुराणे ८२ अध्यायः ॥

त्रयोदशमनुः । यथा,—
“ततश्च मेरुसावर्णे ब्रह्मसूनुर्मनुः स्मृतः ।
ऋतुश्च ऋतुधामा च विष्वक्सेनो मनुस्तथा ॥”
इति मात्स्ये ९ अध्यायः ॥

विष्वक्सेनप्रिया, स्त्री, ( विष्वक्सेनस्य प्रिया । ) वाराही । इत्यमरः ॥ चामार आलु इति भाषा ॥ लक्ष्मीः । इति मेदिनी । ये, १३४ ॥

विष्वक्सेना, स्त्री, प्रियङ्गुः । इत्यमरः ॥

विष्वणनं, क्ली, भोजनम् । इति जटाधरः ॥ शब्दकरणम् । यथा । विष्वणति वीणा । इति मुग्धबोधव्याकरणम् ॥

विष्वद्र्यङ्, [च] त्रि, ( विष्वगञ्चतीति । अञ्च + क्विप् । “विष्वग्देवयोश्चेति ।” ६।३।९२। इति टेः स्थाने अद्र्यादेशः । ) सर्व्वतोगामी । इत्यमरः । (यथा, माघे । १८ । २५ ।
“विष्वद्रीचीर्विक्षिपन् सैन्यवीची-
राजावन्तः क्वापि दूरं प्रयातम् ॥”)

विष्वाणः, पुं, भक्षणम् । इति हेमचन्द्रः ॥

विसं, क्ली, मृणालम् । इत्यमरः ॥ ( यथा, कलाविलासे । ६ ।
“नवविसकिसलयकवलन-
कषायकलहंसकलरवो यत्र ।
कमलवनेषु प्रसरति
लक्ष्म्या इव नूपुरारावः ॥”)

विसंवादः, पुं, ( वि + सं + वद + घञ् । ) विप्रलम्भः । इत्यमरः ॥ ( यथा, महाभारते ।१२ । २५८ । ११ ।
“अद्रोहमविसंवादं प्रवर्त्तन्ते तदाश्रयाः ॥”)

विसकण्ठिका, स्त्री, ( विससदृशः शुभ्रः कण्ठो यस्या इति बहुव्रीहौ कन् टापि अत इत्वम् ।) बलाका । इत्यमरः ॥

विसकुसुमं, क्ली, ( विसस्य कुसुमम् । ) कमलम् । इति राजनिर्घण्टः ॥

विसखूटः, पुं, सिंहः । इति शब्दचन्द्रिका ॥ इङ्गुदीवृक्षः । इति राजनिर्घण्टः ॥

विसजं, क्ली, ( विसाज्जायते इति । जन् + डः ।) पद्मम् । विसं मृणालं तत्र जातत्वात् ॥

विसनाभिः, पुं, ( विसं नाभिरुत्पत्तिस्थानं यस्य ।) पद्मिनी । पद्मसमूहः । इति त्रिकाण्डशेषः ॥

विसप्रसूनं, क्ली, पद्मम् । इत्यमरः । (यथा, शिशुपालवधे । ५ । २८ ।
“जक्षुर्व्विसं धृतविकासिविसप्रसूनाः ॥”)

विसरः, पुं, ( विसरतीति । वि + सृ + पचाद्यच् । ) समूहः । इत्यमरः ॥ प्रसरः । इति मेदिनी । रे, २१७ ॥

विसर्गः, पुं, (वि + सृज + घञ् ।) दानम् । (यथा, रघुवंशे । ४ । ८६ ।
“आदानं हि विसर्गाय सतां वारिमुचामिव ॥”)
त्यागः । ( यथा, महाभारते । १ । ३२ । १३ ।
“नानाशस्त्रविसर्गैस्तैर्व्विध्यमानः समन्ततः ॥”)
मलनिर्गमः । विसर्ज्जनीयः । ( यथा, भागवते । ६ । ८ । १० ।
“सविसर्गं फडन्तं तत् सर्व्वदिक्षु विनिर्द्दिशेत् ॥”)
सूर्य्यस्यायनभेदः । इति मेदिनी । गे, ५० ॥ मोक्षः । इति हलायुधः ॥ विरहः । इति शब्दरत्नावली ॥ विशेषसृष्टिः । यथा,—
“पुरुषानुगृहीतानामेतेषां वासनामयः ।
विसर्गोऽयं समाहारो बीजाद्वीजं चराचरम् ॥”
इति श्रीभागवतम् ॥

विसर्ज्जनीयस्य पर्य्यायः ।
“अः सर्गो रसना वक्त्रं विसर्गश्च द्विबिन्दुकः ।
नादोऽर्द्धेन्दुरर्द्धमात्रा कला रात्री सदाशिवः ।
अनुत्तार्य्या तुरीया च विश्वमातृकला परा ॥”
इति बीजाभिधानम् ॥

अपि च ।
“अः कण्ठको महासेनः कला पूर्णामृता हरिः ।
इच्छा भद्रा गणेशश्च रतिविद्यामुखी सुखम् ॥
द्विबिन्दुरसना सोमोऽनिरुद्धो दुःखसूचकः ।
द्विजिह्वः कुञ्चलं वक्त्रं सर्गः शक्तिर्निशाकरः ।
सुन्दरी सुयशानन्ता गणनाथो महेश्वरः ॥”
इति बीजवर्णाभिधानान्तरम् ॥

अन्यच्च ।
“विसर्गः सर्गमाख्यातो वियद्विषयमासवः ।
अनिरुद्धो महेशानि कालघ्नोऽपि रमापि च ॥”
इति वर्णाभिधानम् ॥
( प्रयोगः । यथा, भागवते । १ । ५ । ११ ।
“तद्वाग्विसर्गो जनताघविप्लवः ॥”)

विसर्ज्जनं, क्ली, ( वि + सृज् + ल्युट् । ) दानम् ; परित्यागः । इत्यमरः ॥ (यथा, रघुवंशे ।८।२५।
“श्रुतदेहविसर्ज्जनं पितु-
श्चिरमश्रूणि विमुच्य राघवः ॥”)
संप्रेषणम् । इति मेदिनी । ने,२०५॥ (पुं, यदुवंशीयानामन्यतमः । यथा भागवते ।११।३०।१८।
“विसर्ज्जनाः कुकुराः कुन्तयश्च
मिथस्तु जघ्नुः सुविसृज्य सौहृदम् ॥”
विशेषेण सृज्यते इति । वि + सृज + कर्म्मणि ल्युट् । उत्पादिते, त्रि । यथा, भागवते । १० । १६ । ५७ ।
“त्वया सृष्टमिदं विश्वं धातुर्गुणविसर्ज्जनम् ॥”)

विसर्पः, पुं, ( वि + सृप + घञ् । ) रोगविशेषः । तत्पर्य्यायः । विसर्पि: २ सर्पिषामयः ३ । इति राजनिर्घण्टः ॥ तस्य विप्रकृष्टं निदानं संख्यां निरुक्तिञ्चाह ।
“लवणाम्लकटूष्णादिसेवनाद्दोषकोपतः ।
विसर्पः सप्तधा ज्ञेयः सर्व्वतः परिसर्पणात् ॥”
आदिशब्दाच्चरकोक्तहरितशाकशिण्डाकप्रभृतीनां ग्रहणम् ॥ * ॥ सप्तधात्वं विवृणोति ।
“पृथक् त्रयस्त्रिभिश्चैको विसर्पा द्वन्द्वजास्त्रयः ।
वातिकः पैत्तिकश्चैव कफजः सान्निपातिकः
चत्वार एते वीसर्पा वक्ष्यन्ते द्वन्द्वजास्त्रयः ॥
आग्नेयो वातपित्ताभ्यां ग्रन्थाख्यः कफवातजः ।
यस्तु कर्द्दमको घोरः स पित्तकफसम्भवः ॥” * ॥
विसर्पदोषदूष्याणि संगृह्णाह ।
“रक्तं लसीका त्वङ्मांसं दूष्यं दोषास्त्रयो मलाः ।
विसर्पाणां समुत्पत्तौ हेतवः सप्त धातवः ॥”
त्रयो मलाः वातपित्तकफाः । दोषाः दूषका इत्यर्थः । अन्यथा दोषा मला इत्यत्र पुनरुक्तिदोषोऽगलिष्यत् ॥ * ॥ वातिकस्य लक्षणमाह ।
“तत्र वातात् परीसर्पो वातज्वरसमव्यथः ।
शोफस्फुरणनिस्तोदभेदायामार्त्तिहर्षवान् ॥”
परीसर्पो विसर्पः । वातज्वरसमव्यथः शिरोहृद्गात्रोदरशूलादियुक्तः । भेदः विदारणमेव यथा । आयामः आकर्षणमेव यथा ॥ * ॥ पैत्तिकमाह ।
“पित्ताद्द्रुतगतिः पित्तज्वरलिङ्गोऽतिलोहितः ॥”
द्रुतगतिः शीघ्रप्रसरणशीलः ॥ * ॥ श्लैष्मिकमाह ।
“कफात् कण्डुयुतः स्निग्धः कफज्वरसमानरुक् ॥”
सान्निपातिकमाह ।
“सन्निपातसमुत्थश्च सर्व्वरूपसमन्वितः ॥” * ॥
वातपैत्तिकस्याग्निविसर्पाख्यस्य च लक्षणमाह ।
“वातपित्ताज्ज्वरच्छर्द्दिमूर्च्छातीसारतृड्भ्रमैः ।
अस्थिभेदाग्निसदनतमकारोचकैर्युतः ॥
करोति सर्व्वमङ्गञ्च दीप्ताङ्गारावकीर्णवत् ।
यं यं देशं विसर्पश्च संसर्पति भवेत् स सः ॥
शान्ताङ्गारासितो नीलो रक्तो वा लूपचीयते ।
अग्निदग्ध इव स्फोटैः शीघ्रगत्वात् द्रुतश्च सः ॥
मर्म्मानुसारी वीसर्पः स्यादतोऽतिबलस्ततः ।
व्यथेताङ्गं हरेत् संज्ञां निद्राञ्च श्वासमीरयेत् ॥
हिक्काञ्च संगतोऽवस्थामीदृशीं लभते नरः ।
क्वचिच्छर्म्मारतिग्रस्तो भूमिशय्यासनादिषु ॥
चेष्टमानस्ततः क्लिष्टो मनोदेहसमुद्भवाम् ।
दुःप्रबोधोऽश्नुते निद्रां सोऽग्निवीसर्प उच्यते ॥”
स्फोटैः उपचीयत इत्यन्वयः । मर्म्मानुसारी हृदयानुसारी । हरेत् वीसर्प इत्यन्वयः । हिक्कां हिक्काम् । ईरयेत् उत्पत्तुं प्रेरयेत् । मनोदेहसमुद्भवां निद्रां मरणरूपाम् । अश्नुते प्राप्नोति ॥ * ॥
वातश्लैष्मिकग्रन्थिविसर्पमाह ।
“कफेन रुद्धः पवनो भित्त्वा तं बहुधा कफम् ।
रक्तं वा वृद्धरक्तस्य त्वक्शिरास्नायुमांसगम् ।
दूषयित्वा तु दीर्घाणुवृत्तस्थूलखरात्मनाम् ।
ग्रन्थीनां कुरुते मालां रक्तानां तीव्ररुग्ज्वराम् ॥
श्वासकासातिसारास्यशोषहिक्कावमिभ्रमैः ।
मोहवैवर्ण्यमूर्च्छाङ्गभङ्गाग्निसदनैर्युतः ।
इत्ययं ग्रन्थिवीसर्पो वातश्लेष्मप्रकोपजः ॥”
कफेन स्वहेतुदुष्टेन पवनोऽपि स्वहेतुदुष्टः । तेनायं वातश्लैष्मिकः । तं कफं बहुधा भित्त्वा रक्तं वा दूषयित्वा इत्यन्वयः । त्वगादिकमिति रक्तविशेषणम् ॥ * ॥ पित्तश्लैष्मिकं कर्द्दमाख्यं विसर्पमाह ।
“कफपित्तज्वरास्तम्भो निद्रातन्द्राशिरोरुजा ।
अङ्गावसादविक्षेपप्रलापारोचकभ्रमाः ॥
मूर्च्छाग्निहानिर्भेदोऽस्थ्नां पिपासेन्द्रियगौरवम् ।